# Shri Shivakamasundari Sahasranamavali from Rudrayamala

# श्रीशिवकामसुन्दरीसहस्रनामावलिः रुद्रयामलान्तर्गता

## Document Information

Text title : shrI shivakAmasundarI sahasranAmAvalI 2 from rudrayAmala

File name : shivakAmasundarIsahasranAmAvalIrudrayAmala.itx

Category : sahasranAmAvalI, devii, nAmAvalI, devI, pArvatI

Location : doc_devii

Proofread by : DPD, Sneha Sudha snehasudha13 at gmail.com

Description-comments : Mahaperiaval trust publication

Source : Rudrayamalatantra

Latest update : May 1, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 17, 2022

*sanskritdocuments.org*

# श्रीशिवकामसुन्दरीसहस्रनामावलिः रुद्रयामलान्तर्गता

अस्य श्रीशिवकामसुन्दरीसहस्रनाम स्तोत्रमहामन्त्रस्य ।
सदाशिव ऋषिः अनुष्टुप् छन्दः श्रीमच्छिवकामसुन्दरी देवता ।
वाग्भवस्वरूपं ऐं बीजम् । चिदानन्दात्मकं ह्रीं शक्तिः ।
कामराजात्मकं क्लीं कीलकम् ।
श्रीमच्छिवकामसुन्दरीप्रसादसिद्ध्यर्थे जपे विनियोगः ॥

षोडशार्णमूलेन न्यासः ॥

षोडशार्णध्यानमेव अत्रापि ध्यानम् ।

सिद्धसिद्धनवरत्नभूमिके कल्पवृक्षनववाटिसंवृते ।
रत्नसालवनसम्भृतेऽनिशं तत्र वापिशतकेन संवृते ॥

रत्नवाटिमणिमण्डपेऽरुणे चपडभानुशतकोटिभासुरे ।
आदिशैवमणिमञ्चके परे शङ्कराङ्कमणिपीठकोपरि ॥

कादिहान्तमनुरूपिणीं शिवां संस्मरेच्च शिवकामसुन्दरीम् ॥

लमित्यादि पञ्चपूजा ॥

शिवकामेश्वरीनामसाहस्रस्तोत्रमुत्तमम् ।
प्रोच्यते श्रद्धया देवि शृणुष्वावहिता प्रिये ॥

कामेशीनामसाहस्रे सदाशिव ऋषिः स्मृतः ।
छन्दोऽनुष्टुप् देवता च शिवकामेश्वरी स्मृता ॥

ऐं बीजं कीलकं क्लीं च ह्रीं शक्तिः कथिता प्रिये ।
न्यासध्यानादिकं सर्वं षोडशार्णवदीरितम् ॥

अनेन स्तोत्रराजेन सर्वाभीष्टं लभेत ना ॥

अथ सहस्रनामावलिः ॥

ॐ श्रीशिवायै नमः ।
ॐ शिवकाम्यै नमः ।
ॐ सुन्दर्यै नमः ।
ॐ भुवनेश्वर्यै नमः ।
ॐ आनन्दसिन्धवे नमः ।
ॐ आनन्दायै नमः ।
ॐ आनन्दमूर्तये नमः ।
ॐ विनोदिन्यै नमः ।
ॐ त्रैपुर्यै सुन्दर्यै नमः ।
ॐ प्रेमपाथोनिधये नमः । १०
ॐ अनुत्तमायै नमः ।
ॐ रामोल्लासायै नमः ।
ॐ परायै नमः ।
ॐ भूत्यै नमः ।
ॐ विभूत्यै नमः ।
ॐ शङ्करप्रियायै नमः ।
ॐ शृङ्गारमूर्तये नमः ।
ॐ विरतायै नमः ।
ॐ रसानुभवरोचनायै नमः ।
ॐ परमानन्दलहर्यै नमः । २०
ॐ रत्यै नमः ।
ॐ अङ्गवत्यै नमः ।
ॐ सत्यै नमः ।
ॐ रङ्गमालायै नमः ।
ॐ अङ्गकलाकेल्यै नमः ।
ॐ कैवल्यदायै नमः ।
ॐ कलायै नमः ।
ॐ रसकल्पायै नमः ।
ॐ कल्पलतायै नमः ।
ॐ कुतूहलवत्यै नमः । ३०
ॐ गत्यै नमः ।
ॐ विनोददुग्धायै नमः ।

ॐ सुस्निग्धायै नमः ।
ॐ मुग्धमूर्तये नमः ।
ॐ मनोहरायै नमः ।
ॐ बालार्ककोटिकिरणायै नमः ।
ॐ चन्द्रकोटिसुशीतलायै नमः ।
ॐ स्रवत्पीयूषदिग्धाङ्ग्यै नमः ।
ॐ सङ्गीत नटिकायै नमः ।
ॐ शिवायै नमः । ४०
ॐ कुरङ्गनयनायै नमः ।
ॐ कान्तायै नमः ।
ॐ सुखसन्तत्यै नमः ।
ॐ इन्दिरायै नमः ।
ॐ मङ्गलायै नमः ।
ॐ मधुरापाङ्गायै नमः ।
ॐ रञ्जन्यै नमः ।
ॐ रमणीरत्यै नमः ।
ॐ राजराजेश्वर्यै नमः ।
ॐ राज्ञ्यै नमः । ५०
ॐ महेन्द्रपरिवन्दितायै नमः ।
ॐ प्रपञ्चगत्यै नमः ।
ॐ इशान्यै नमः ।
ॐ सामरस्यपरायणायै नमः ।
ॐ हंसोल्लासायै नमः ।
ॐ हंसगत्यै नमः ।
ॐ शिञ्जत्कनकनूपुरायै नमः ।
ॐ मेरुमन्दरवक्षोजायै नमः ।
ॐ सृणिपाशवरायुधायै नमः ।
ॐ शङ्खकोदण्डसस्ताब्जपाणिद्वयविराजितायै नमः । ६०
ॐ चन्द्रबिम्बाननायै नमः ।
ॐ चारुमकुटोत्तंसचन्द्रिकायै नमः ।
ॐ सिन्दूरतिलकायै नमः ।
ॐ चारुधम्मिल्लामलमालिकायै नमः ।

ॐ मन्दारदाममुदितायै नमः ।
ॐ रक्तपुष्पविभूषितायै नमः ।
ॐ सुवर्णाभरणप्रीतायै नमः ।
ॐ मुक्तादाममनोहरायै नमः ।
ॐ ताम्बूलपूरवदनायै नमः ।
ॐ मदनानन्दमानसायै नमः । ७०
ॐ सुखाराध्यायै नमः ।
ॐ तपस्सारायै नमः ।
ॐ कृपावारिधये नमः ।
ॐ इश्वर्यै नमः ।
ॐ वक्षःस्थललसन्मग्नायै नमः ।
ॐ प्रभायै नमः ।
ॐ मधुरसोन्मुखायै नमः ।
ॐ बिन्दुनादात्मिकायै नमः ।
ॐ चारुरसितायै नमः ।
ॐ तुर्यरूपिण्यै नमः । ८०
ॐ कमनीयाकृत्यै नमः ।
ॐ धन्यायै नमः ।
ॐ शङ्करप्रीतिमञ्जर्यै नमः ।
ॐ कन्यायै नमः ।
ॐ कलावत्यै नमः ।
ॐ मात्रे नमः ।
ॐ गजेन्द्रगमनायै नमः ।
ॐ शुभायै नमः ।
ॐ कुमार्यै नमः ।
ॐ करभोरु श्रीयै नमः । ९०
ॐ रूपलक्ष्मीयै नमः ।
ॐ सुराजितायै नमः ।
ॐ सन्तोषसीमायै नमः ।
ॐ सम्पत्त्यै नमः ।
ॐ शातकुम्भप्रियायै नमः ।
ॐ द्युत्यै नमः ।

ॐ परिपूर्णायै नमः ।
ॐ जगद्धात्र्यै नमः ।
ॐ विधात्र्यै नमः ।
ॐ बलवर्धिन्यै नमः । १००
ॐ सार्वभौमनृपश्रीयै नमः ।
ॐ साम्राज्यगतिरासिकायै नमः ।
ॐ सरोजाक्ष्यै नमः ।
ॐ दीर्घदृष्ट्यै नमः ।
ॐ सौचक्षणविचक्षणायै नमः ।
ॐ रङ्गस्रवन्त्यै नमः ।
ॐ रसिकायै नमः ।
ॐ प्रधानरसरूपिण्यै नमः ।
ॐ रससिन्धवे नमः ।
ॐ सुगात्र्यै नमः । ११०
ॐ युवत्यै नमः ।
ॐ मैथुनोन्मुख्यै नमः ।
ॐ निरन्तरायै नमः ।
ॐ रसासक्तायै नमः ।
ॐ शक्तियै नमः ।
ॐ त्रिभुवनात्मिकायै नमः ।
ॐ कामाक्ष्यै नमः ।
ॐ कामनिष्ठायै नमः ।
ॐ कामेश्यै नमः ।
ॐ भगमङ्गलायै नमः । १२०
ॐ सुभगायै नमः ।
ॐ भगिन्यै नमः ।
ॐ भोग्यायै नमः ।
ॐ भाग्यदायै नमः ।
ॐ भगदायै नमः ।
ॐ भगायै नमः ।
ॐ भगलिङ्गानन्दकलायै नमः ।
ॐ भगमध्यनिवासिन्यै नमः ।

ॐ भगरूपायै नमः ।
ॐ भगमय्यै नमः । १३०
ॐ भगयन्त्रायै नमः ।
ॐ भगोत्तमायै नमः ।
ॐ योनये नमः ।
ॐ जयायै नमः ।
ॐ कामकलायै नमः ।
ॐ कुलामृतपरायणायै नमः ।
ॐ कुलकुण्डालयायै नमः ।
ॐ सूक्ष्मजीवस्फुलिङ्गरूपिण्यै नमः ।
ॐ मूलस्थितायै नमः ।
ॐ केलिरतायै नमः । १४०
ॐ वलयाकृत्यै नमः ।
ॐ इडितायै नमः ।
ॐ सुषुम्नायै नमः ।
ॐ कमलानन्दायै नमः ।
ॐ चित्रायै नमः ।
ॐ कूर्मगतये नमः ।
ॐ गिरये नमः ।
ॐ सितारुणायै नमः ।
ॐ सिन्धुरूपायै नमः ।
ॐ प्रवेगायै नमः । १५०
ॐ निर्धन्यै नमः ।
ॐ क्षमायै नमः ।
ॐ धण्टाकोटिरसारावायै नमः ।
ॐ रविबिम्बोत्थितायै नमः ।
ॐ अद्भूतायै नमः ।
ॐ नादान्तलीनायै नमः ।
ॐ सम्पूर्णायै नमः ।
ॐ प्रणवायै नमः ।
ॐ बहुरूपिण्यै नमः ।
ॐ भृङ्गारावायै नमः । १६०

ॐ वशगत्यै नमः ।
ॐ वागीश्यै नमः ।
ॐ मधुरध्वन्यै नमः ।
ॐ वर्णमालायै नमः ।
ॐ सिद्धिकलायै नमः ।
ॐ षड्वक्रक्रमवासिन्यै नमः ।
ॐ मणिपूरस्थितायै नमः ।
ॐ स्निग्धायै नमः ।
ॐ कूर्मचक्रपरायणायै नमः ।
ॐ मूलकेलिरतायै नमः । १७०
ॐ साध्व्यै नमः ।
ॐ स्वाधिष्ठाननिवासिन्यै नमः ।
ॐ अनाहतगतये नमः ।
ॐ दीपायै नमः ।
ॐ शिवानन्दमयद्युत्यै नमः ।
ॐ विरुद्धरुधायै नमः ।
ॐ सम्बुद्धायै नमः ।
ॐ जीवभोक्र्यै नमः ।
ॐ स्थलीरतायै नमः ।
ॐ आज्ञाचक्रोज्ज्वलस्फारस्फुरन्त्यै नमः । १८०
ॐ निर्गतद्विषायै नमः ।
ॐ चन्द्रिकायै नमः ।
ॐ चन्द्रकोटीश्यै नमः ।
ॐ सूर्यकोटिप्रभामय्यै नमः ।
ॐ पद्मरागारुणच्छायायै नमः ।
ॐ नित्याह्लादमय्ये नमः ।
ॐ प्रभायै नमः ।
ॐ महाशून्यालयायै नमः ।
ॐ चन्द्रमण्डलामृतनन्दितायै नमः ।
ॐ कान्ताङ्गसङ्गमुदितायै नमः । १९०
ॐ सुधामाधुर्यसम्भृतायै नमः ।
ॐ महाचन्द्रस्मितालिसायै नमः ।

ॐ मृत्पात्रस्थायै नमः ।
ॐ सुधाद्युत्यै नमः ।
ॐ स्रवत्पीमूषसंसक्तायै नमः ।
ॐ शश्वत्कुण्डालयायै नमः ।
ॐ भवायै नमः ।
ॐ श्रेयोद्युत्यै नमः ।
ॐ प्रत्यगर्थायै नमः ।
ॐ सेवाफलवत्यै नमः । २००
ॐ मह्यै नमः ।
ॐ शिवायै नमः ।
ॐ शिवप्रियायै नमः ।
ॐ शैवायै नमः ।
ॐ शङ्कर्यै नमः ।
ॐ शाम्भव्यै नमः ।
ॐ विभवे नमः ।
ॐ स्वयम्भू नमः ।
ॐ स्वप्रियायै नमः ।
ॐ स्वीयायै नमः । २१०
ॐ स्वकीयायै नमः ।
ॐ जनमातृकायै नमः ।
ॐ सुरामायै नमः ।
ॐ स्वप्रियायै नमः ।
ॐ श्रेयसे नमः ।
ॐ स्वाधिकाराधिनायिकायै नमः ।
ॐ मण्डलायै नमः ।
ॐ जनन्यै नमः ।
ॐ मान्यायै नमः ।
ॐ सर्वमङ्गलसन्तत्यै नमः । २२०
ॐ भद्रायै नमः ।
ॐ भगवत्यै नमः ।
ॐ भाव्यायै नमः ।
ॐ कलितार्धेन्दुभासुरायै नमः ।

ॐ कल्याणललितायै नमः ।
ॐ काम्यायै नमः ।
ॐ कुकर्मकुमतिप्रदायै नमः ।
ॐ कुरङ्गाक्ष्यै नमः ।
ॐ क्षीरनेत्रायै नमः ।
ॐ क्षीरायै नमः । २३०
ॐ मधुरसोन्मदायै नमः ।
ॐ वारुणीपानमुदितायै नमः ।
ॐ मदिरामुदितायै नमः ।
ॐ स्थिरायै नमः ।
ॐ कादम्बरीपानरुच्यै नमः ।
ॐ विपाशायै नमः ।
ॐ पशुभावनायै नमः ।
ॐ मुदितायै नमः ।
ॐ ललितापाङ्गायै नमः ।
ॐ दरान्दोलितदीर्घदृक् नमः । २४०
ॐ दैत्याकुलानलशिखायै नमः ।
ॐ मनोरथसुधाद्युत्यै नमः ।
ॐ सुवासिन्यै नमः ।
ॐ पीतगात्र्यै नमः ।
ॐ पीनश्रोणिपयोधरायै नमः ।
ॐ सुचारुकबर्यै नमः ।
ॐ दध्युदध्युत्थिमौक्तिकायै नमः ।
ॐ बिम्बाधरद्युत्यै नमः ।
ॐ मुग्धायै नमः ।
ॐ प्रवालोत्तमदीधित्यै नमः । २५०
ॐ तिलप्रसूननासाग्रायै नमः ।
ॐ हेममौक्तिककोरकायै नमः ।
ॐ निष्कलङ्केन्दुवदनायै नमः ।
ॐ बालेन्दुवदनोज्वलायै नमः ।
ॐ नृत्यन्त्यै नमः ।
ॐ अञ्जननेत्रान्तायै नमः ।

ॐ प्रस्फुरत्कर्णशष्कुल्यै नमः ।
ॐ भालचन्द्रातपोन्नद्धायै नमः ।
ॐ मणिसूर्यकिरीटिन्यै नमः ।
ॐ कचौघचम्पकश्रेणीमालिनीदाममण्डितायै नमः । २६०
ॐ हेममाणिक्य ताटङ्कायै नमः ।
ॐ मणिकाञ्चन कुण्डलायै नमः ।
ॐ सुचारुचुबुकायै नमः ।
ॐ कम्बुकण्ठ्यै नमः ।
ॐ कुण्डावल्यै नमः ।
ॐ रमायै नमः ।
ॐ गङ्गातरङ्गहारोर्म्यै नमः ।
ॐ मत्तकोकिलनिस्वनायै नमः ।
ॐ मृणालविलसद्बाहुपाशाकुशधनुर्धरायै नमः ।
ॐ केयूरकङ्कणश्रेण्यै नमः । २७०
ॐ नानामणिमनोरमायै नमः ।
ॐ ताम्रपङ्कजपाणिश्रीयै नमः ।
ॐ नवरत्नप्रभावत्यै नमः ।
ॐ अङ्गुलीयमणिश्रेण्यै नमः ।
ॐ कान्तिमङ्गलसन्तत्यै नमः ।
ॐ मन्दरद्वन्द्वसुकुचायै नमः ।
ॐ रोमराजिभुजङ्गिकायै नमः ।
ॐ गम्भीरनाभ्यै नमः ।
ॐ त्रिवलीभङ्गुरायै नमः ।
ॐ क्षीणमध्यमायै नमः । २८०
ॐ रणत्काञ्चीगुणानद्धायै नमः ।
ॐ पट्टांशुकनितम्बिकायै नमः ।
ॐ मेरुसन्धिनितम्बाढ्यायै नमः ।
ॐ गजशुण्डोरुयुग्मयुजे नमः ।
ॐ सुजानुवे नमः ।
ॐ मदनानन्दमयजङ्घाद्वयान्वितायै नमः ।
ॐ गूढगुल्फायै नमः ।
ॐ मञ्जुशिञ्जन्मणिनूपुरमण्डितायै नमः ।

ॐ पदद्वन्द्वजिताम्भोजायै नमः ।
ॐ नखचन्द्रावलीप्रभायै नमः । २९०
ॐ सुसीमप्रपदायै नमः ।
ॐ राजंहसमत्तेभमन्दगायै नमः ।
ॐ योगिध्येयपदद्वन्द्वायै नमः ।
ॐ सौन्दर्यामृतसारिण्यै नमः ।
ॐ लावपयसिन्धवे नमः ।
ॐ सिन्दूरतिलकायै नमः ।
ॐ कुटिलालकायै नमः ।
ॐ साधुसीमन्तिन्यै नमः ।
ॐ सिद्धबुद्धवृन्दारकोदयायै नमः ।
ॐ बालार्ककिरणश्रेणिशोणश्रीयै नमः । ३००
ॐ प्रेमकामधुक् नमः ।
ॐ रसगम्भीरसरस्यै नमः ।
ॐ पद्मिन्यै नमः ।
ॐ रससारसायै नमः ।
ॐ प्रसन्नासन्नवरदायै नमः ।
ॐ शारदायै नमः ।
ॐ भुवि भाग्यदायै नमः ।
ॐ नटराजप्रियायै नमः ।
ॐ विश्वानाद्यायै नमः ।
ॐ नर्तकनर्तक्यै नमः । ३१०
ॐ चित्रयन्त्रायै नमः ।
ॐ चित्रतन्त्रायै नमः ।
ॐ चित्रविद्यावलीयत्यै नमः ।
ॐ चित्रकूटायै नमः ।
ॐ त्रिकूटायै नमः ।
ॐ पन्धकूटायै नमः ।
ॐ पञ्चम्यै नमः ।
ॐ चतुष्कूटायै नमः ।
ॐ शम्भुविद्यायै नमः ।
ॐ षट्कूटायै नमः । ३२०

ॐ विष्णुपूजितायै नमः ।
ॐ कूटषोडशसम्पन्नायै नमः ।
ॐ तुरीयायै नमः ।
ॐ परमायै कलायै नमः ।
ॐ षोडश्यै नमः ।
ॐ मन्त्रयन्त्राणां ईश्वर्यै नमः ।
ॐ मेरुमण्डलायै नमः ।
ॐ षोडशार्णायै नमः ।
ॐ त्रिवर्णायै नमः ।
ॐ बिन्दुनादस्वरूपिण्यै नमः । ३३०
ॐ वर्णातीतायै नमः ।
ॐ वर्णमतायै नमः ।
ॐ शब्दब्रह्ममय्यै नमः ।
ॐ सुखायै नमः ।
ॐ सुखज्योत्स्नानन्दविद्युते नमः ।
ॐ अन्तराकाशदेवतायै नमः ।
ॐ चैतन्यायै नमः ।
ॐ विधिकूटात्मायै नमः ।
ॐ कामेश्यै नमः ।
ॐ स्वप्नदर्शनायै नमः । ३४०
ॐ स्वप्नरूपायै नमः ।
ॐ बोधकर्यै नमः ।
ॐ जाग्रत्यै नमः ।
ॐ जागराश्रयायै नमः ।
ॐ स्वप्नाश्रयायै नमः ।
ॐ सुषुप्तिस्थायै नमः ।
ॐ तन्त्रमूर्त्यै नमः ।
ॐ माधव्यै नमः ।
ॐ लोपामुद्रायै नमः ।
ॐ कामराज्यै नमः । ३५०
ॐ माधव्यै नमः ।
ॐ मित्ररूपिण्यै नमः ।

ॐ शाङ्कर्यै नमः ।
ॐ नन्दिविद्यायै नमः ।
ॐ भास्वन्मण्डलमध्यगायै नमः ।
ॐ माहेन्द्रस्वर्गसम्पत्त्यै नमः ।
ॐ दूर्वासस्सेवितायै नमः ।
ॐ श्रुत्यै नमः ।
ॐ साधकेन्द्रगत्यै नमः ।
ॐ साध्व्यै नमः । ३६०
ॐ सुलिप्तायै नमः ।
ॐ सिद्धिकन्धरायै नमः ।
ॐ पुरत्रयेश्यै नमः ।
ॐ पुरकृते नमः ।
ॐ षष्ठ्यै नमः ।
ॐ परदेवतायै नमः ।
ॐ विघ्नदूर्यै नमः ।
ॐ भूरिगुणायै नमः ।
ॐ पुष्ट्यै नमः ।
ॐ पूजितकामधुहे नमः । ३७०
ॐ हेरम्बमात्रे नमः ।
ॐ गणपायै नमः ।
ॐ गुहाम्बायै नमः ।
ॐ आर्यायै नमः ।
ॐ नितम्बिन्यै नमः ।
ॐ एतस्यै नमः ।
ॐ सीमन्तिन्यै नमः ।
ॐ मोक्षदक्षायै नमः ।
ॐ दीक्षितमातृकायै नमः ।
ॐ साधकाम्बायै नमः । ३८०
ॐ सिद्धमात्रे नमः ।
ॐ साधकेन्द्रमनोरमायै नमः ।
ॐ यौवनोन्मादिन्यै नमः ।
ॐ तुङ्गस्तन्यै नमः ।

ॐ सुश्रोणिमण्डितायै नमः ।
ॐ पद्मरक्तोत्पलवत्यै नमः ।
ॐ रक्तमाल्यानुलेपनायै नमः ।
ॐ रक्तमाल्यरुचये नमः ।
ॐ दक्षायै नमः ।
ॐ शिखण्डिन्यै नमः । ३९०
ॐ अतिसुन्दर्यै नमः ।
ॐ शिखण्डिनृत्यसन्तुष्टायै नमः ।
ॐ शिखण्डिकुलपालिन्यै नमः ।
ॐ वसुन्धरायै नमः ।
ॐ सुरभयै नमः ।
ॐ कमनीयतनवे नमः ।
ॐ शुभायै नमः ।
ॐ नन्दिन्यै नमः ।
ॐ त्रीक्षणवत्यै नमः ।
ॐ वसिष्ठालयदेवतायै नमः । ४००
ॐ गोलकेश्यै नमः ।
ॐ लोकेन्द्रायै नमः ।
ॐ नृलोकपरिपालिकायै नमः ।
ॐ हविर्धात्र्यै नमः ।
ॐ देवमात्रे नमः ।
ॐ वृन्दारकपरात्मयुकजे नमः ।
ॐ रुद्रमात्रे नमः ।
ॐ रुद्रपत्न्यै नमः ।
ॐ मदोद्गारभरायै नमः ।
ॐ क्षित्यै नमः । ४१०
ॐ दक्षिणायै नमः ।
ॐ यज्ञसम्पत्त्यै नमः ।
ॐ स्वबलायै नमः ।
ॐ धीरनन्दितायै नमः ।
ॐ क्षीरपूर्णार्णवगत्यै नमः ।
ॐ सुधायोनये नमः ।

ॐ सुलोचनायै नमः ।
ॐ रमायै नमः ।
ॐ तुङ्गायै नमः ।
ॐ सदासेव्यायै नमः । ४२०
ॐ सुरसङ्घदयायै नमः ।
ॐ उमायै नमः ।
ॐ सुचरित्रायै नमः ।
ॐ चित्रवरायै नमः ।
ॐ सुस्तन्यै नमः ।
ॐ वत्सवत्सलायै नमः ।
ॐ रजस्वलायै नमः ।
ॐ रजोयुक्तायै नमः ।
ॐ रञ्जितायै नमः ।
ॐ रङ्गमालिकायै नमः । ४३०
ॐ रक्तप्रियायै नमः ।
ॐ सुरक्तायै नमः ।
ॐ रतिरङ्गस्वरूपिण्यै नमः ।
ॐ रजश्शुक्लाक्षिकायै नमः ।
ॐ निष्ठायै नमः ।
ॐ ऋतुस्नातायै नमः ।
ॐ रतिप्रियायै नमः ।
ॐ भाव्यभाव्यायै नमः ।
ॐ कामकेल्यै नमः ।
ॐ स्मरभूवे नमः । ४४०
ॐ स्मरजीविकायै नमः ।
ॐ समाधिकुसुमानन्दायै नमः ।
ॐ स्वयम्भुकुसुमप्रियायै नमः ।
ॐ स्वयम्भुप्रेमसन्तुष्टायै नमः ।
ॐ स्वयम्भूनिन्दकान्तकायै नमः ।
ॐ स्वयम्भुस्थायै नमः ।
ॐ शक्तिपुटायै नमः ।
ॐ रवये नमः ।

ॐ सर्वस्वपेटिकायै नमः ।
ॐ अत्यन्तरसिकायै नमः । ४५०
ॐ दूत्यै नमः ।
ॐ विदग्धायै नमः ।
ॐ प्रीतिपूजितायै नमः ।
ॐ तूलिकायन्त्रनिलयायै नमः ।
ॐ योगपीठनिवासिन्यै नमः ।
ॐ सुलक्षणायै नमः ।
ॐ दृश्यरूपायै नमः ।
ॐ सर्व लक्षणलक्षितायै नमः ।
ॐ नानालङ्कारसुभगायै नमः ।
ॐ पञ्चकामशरार्चितायै नमः । ४६०
ॐ ऊर्ध्वत्रिकोणयन्त्रस्थायै नमः ।
ॐ बालायै नमः ।
ॐ कामेश्वर्यै नमः ।
ॐ गुणाध्यक्षायै नमः ।
ॐ कुलाध्यक्षायै नमः ।
ॐ लक्ष्मीयै नमः ।
ॐ सरस्वत्यै नमः ।
ॐ वसन्तमदायै नमः ।
ॐ उत्तुङ्गस्तन्यै नमः ।
ॐ कुचभरोन्नतायै नमः । ४७०
ॐ कलाधरमुख्यै नमः ।
ॐ मूर्धपाथोधये नमः ।
ॐ कलावत्यै नमः ।
ॐ दक्षपादादिशीर्षान्तषोडशस्वरसंयुतायै नमः ।
ॐ श्रद्धायै नमः ।
ॐ पूर्त्यै नमः ।
ॐ रत्यै नमः ।
ॐ भूत्यै नमः ।
ॐ कान्त्यै नमः ।
ॐ मनोरमायै नमः । ४८०

ॐ विमलायै नमः ।
ॐ योगिन्यै नमः ।
ॐ घोरायै नमः ।
ॐ मदनोन्मादिन्यै नमः ।
ॐ मदायै नमः ।
ॐ मोदिन्यै नमः ।
ॐ दीपिन्यै नमः ।
ॐ शोषिण्यै नमः ।
ॐ वशङ्कर्यै नमः ।
ॐ रजन्यन्तायै नमः । ४९०
ॐ कामकलायै नमः ।
ॐ लसत्कमलधारिण्यै नमः ।
ॐ वाममूर्धादिपादान्तषोडशस्वरसं युतायै नमः ।
ॐ पूषरूपायै नमः ।
ॐ सुमनसां सेव्यायै नमः ।
ॐ प्रीत्यै नमः ।
ॐ द्युत्यै नमः ।
ॐ ऋद्ध्यै नमः ।
ॐ सौदामिन्यै नमः ।
ॐ चिदे नमः । ५००
ॐ हंसमालावृतायै नमः ।
ॐ शशिन्यै नमः ।
ॐ स्वस्थायै नमः ।
ॐ सम्पूर्णमण्डलोदयायै नमः ।
ॐ पुष्ट्यै नमः ।
ॐ अमृतपूर्णायै नमः ।
ॐ भगमालास्वरूपिण्यै नमः ।
ॐ भगयन्त्राश्रयायै नमः ।
ॐ शम्भुरूपायै नमः ।
ॐ संयोगयोगिन्यै नमः । ५१०
ॐ द्राविण्यै नमः ।
ॐ बीजरूपायै नमः ।

ॐ अक्षुब्धायै नमः ।
ॐ साधकप्रियायै नमः ।
ॐ रजः पीठमय्यै नमः ।
ॐ नाद्यायै नमः ।
ॐ सुखदायै नमः ।
ॐ वाञ्छितप्रदायै नमः ।
ॐ रजस्संविदे नमः ।
ॐ रजश्शक्त्यै नमः । ५२०
ॐ शुक्लबिन्दुस्वरूपिण्यै नमः ।
ॐ सर्वसाक्ष्यै नमः ।
ॐ सामरस्यायै नमः ।
ॐ शिवशक्तिमय्यै नमः ।
ॐ प्रभायै नमः ।
ॐ संयोगानन्दनिलयायै नमः ।
ॐ संयोगप्रीतिमातृकायै नमः ।
ॐ संयोगकुसुमानन्दायै नमः ।
ॐ संयोगयोगपद्धत्यै नमः ।
ॐ संयोगसुखदावस्थायै नमः । ५३०
ॐ चिदानन्दार्घ्यसेवितायै नमः ।
ॐ अर्घ्यपूज्यायै नमः ।
ॐ सम्पत्त्यै नमः ।
ॐ अर्घ्यदाभिन्नरूपिण्यै नमः ।
ॐ सामरस्यपरायै नमः ।
ॐ प्रीतायै नमः ।
ॐ प्रियसङ्गमरङ्गिण्यै नमः ।
ॐ ज्ञानदूत्यै नमः ।
ॐ ज्ञानगम्यायै नमः ।
ॐ ज्ञानयोनये नमः । ५४०
ॐ शिवालायायै नमः ।
ॐ चित्कलायै नमः ।
ॐ सत्कलायै नमः ।
ॐ ज्ञानकलायै नमः ।

ॐ संवित्कलात्मिकायै नमः ।
ॐ कलाचतुष्टय्यै नमः ।
ॐ पद्मवासिन्यै नमः ।
ॐ सूक्ष्मरूपिण्यै नमः ।
ॐ हंसकेलिस्थलस्वस्थायै नमः ।
ॐ हंसद्वयविकासिन्यै नमः । ५५०
ॐ विरागितायै नमः ।
ॐ मोक्षकलायै नमः ।
ॐ परमात्मकलावत्यै नमः ।
ॐ विद्याकलायै नमः ।
ॐ अन्तरात्मस्थायै नमः ।
ॐ चतुष्टयकलावत्यै नमः ।
ॐ विद्यासन्तोषणायै नमः ।
ॐ तृप्त्यै नमः ।
ॐ परब्रह्मप्रकाशिन्यै नमः ।
ॐ परमात्मपरायै नमः । ५६०
ॐ वस्तुलीनायै नमः ।
ॐ शक्तिचतुष्टय्यै नमः ।
ॐ शान्त्यै नमः ।
ॐ बोधकलायै नमः ।
ॐ व्याप्त्यै नमः ।
ॐ परज्ञानात्मिकायै कलायै नमः ।
ॐ पश्यन्त्यै नमः ।
ॐ परमात्मस्थायै नमः ।
ॐ अन्तरात्मकलायै नमः ।
ॐ शिवायै नमः । ५७०
ॐ मध्यमायै नमः ।
ॐ वैखर्यै नमः ।
ॐ आत्मकलायै नमः ।
ॐ आनन्दकलावत्यै नमः ।
ॐ तरुण्यै नमः ।
ॐ तारकायै नमः ।

ॐ तारायै नमः ।
ॐ शिवलिङ्गालयायै नमः ।
ॐ आत्मविदे नमः ।
ॐ परस्परस्वभावायै नमः । ५८०
ॐ ब्रह्मज्ञानविनोदिन्यै नमः ।
ॐ रामोल्लासायै नमः ।
ॐ दुर्धर्षायै नमः ।
ॐ परमार्घ्यप्रियायै नमः ।
ॐ रमायै नमः ।
ॐ जात्यादिरहितायै नमः ।
ॐ योगिन्यै नमः ।
ॐ आनन्दमात्रपद्धत्यै नमः ।
ॐ कान्तायै नमः ।
ॐ शान्तायै नमः । ५९०
ॐ कलितायै नमः ।
ॐ होमपद्धत्यै नमः ।
ॐ दिव्यभावप्रदायै नमः ।
ॐ दिव्यायै नमः ।
ॐ वीरसूवे नमः ।
ॐ वीरभावदायै नमः ।
ॐ पशुदेहायै नमः ।
ॐ वीरगत्यै नमः ।
ॐ वीरहंसमनोदयायै नमः ।
ॐ मूर्धाभिषिक्तायै नमः । ६००
ॐ राजश्रीयै नमः ।
ॐ क्षत्रियोत्तममातृकायै नमः ।
ॐ शस्त्रास्त्रकुशलायै नमः ।
ॐ शोभायै नमः ।
ॐ रथस्थायै नमः ।
ॐ युद्धजीविकायै नमः ।
ॐ अश्वारूढायै नमः ।
ॐ गजारूढायै नमः ।

ॐ भूतोक्त्यै नमः ।
ॐ सुरसुश्रयायै नमः । ६१०
ॐ राजनीत्यै नमः ।
ॐ शान्तिकर्त्र्यै नमः ।
ॐ चतुरङ्गबलाश्रयायै नमः ।
ॐ पोषिण्यै नमः ।
ॐ शरणायै नमः ।
ॐ पद्मपालिकायै नमः ।
ॐ जयपालिकायै नमः ।
ॐ विजयायै नमः ।
ॐ योगिन्यै नमः ।
ॐ यात्रायै नमः । ६२०
ॐ परसैन्यविमर्दिन्यै नमः ।
ॐ पूर्णवित्तायै नमः ।
ॐ वित्तगम्यायै नमः ।
ॐ वित्तसञ्चय शालिन्यै नमः ।
ॐ महेश्यै नमः ।
ॐ राज्यभोगायै नमः ।
ॐ गणिकागणभोगभृते नमः ।
ॐ उकारिण्यै नमः ।
ॐ रमायोग्यायै नमः ।
ॐ मन्दसेव्यायै नमः । ६३०
ॐ पदात्मिकायै नमः ।
ॐ सैन्यश्रेण्यै नमः ।
ॐ शौर्यरतायै नमः ।
ॐ पताकाध्वजमालिन्यै नमः ।
ॐ सच्छात्रयै नमः ।
ॐ चामरश्रेण्यै नमः ।
ॐ युवराजविवर्धिन्यै नमः ।
ॐ पूजासर्वस्वसम्भारायै नमः ।
ॐ पूजापालनलालसायै नमः ।
ॐ पूजाभिपूजनीयायै नमः । ६४०

ॐ राजकार्यपरायणायै नमः ।
ॐ ब्रह्मक्षत्रमय्यै नमः ।
ॐ सोमसूर्यवह्निस्वरूपिण्यै नमः ।
ॐ पौरोहित्यप्रियायै नमः ।
ॐ साध्व्यै नमः ।
ॐ ब्रह्माण्यै नमः ।
ॐ यन्त्रसन्तत्यै नमः ।
ॐ सोमपानजनाप्रीतायै नमः ।
ॐ योजनाध्वगतिक्षमायै नमः ।
ॐ प्रीतिग्रहायै नमः । ६५०
ॐ परायै दात्र्यै नमः ।
ॐ श्रेष्ठजात्यै नमः ।
ॐ सताङ्गत्यै नमः ।
ॐ गायत्र्यै नमः ।
ॐ वेदविद्ध्येयायै नमः ।
ॐ दीक्षायै नमः ।
ॐ सन्तोषतर्पणायै नमः ।
ॐ रत्नदीधितिविद्युत्सहसनायै नमः ।
ॐ वैश्यजीविकायै नमः ।
ॐ कृषये नमः । ६६०
ॐ वाणिज्यभूत्यै नमः ।
ॐ वृद्धिदायै नमः ।
ॐ वृद्धसेवितायै नमः ।
ॐ तुलाधारायै नमः ।
ॐ स्वप्नकामायै नमः ।
ॐ मानोन्मानपरायणायै नमः ।
ॐ श्रद्धायै नमः ।
ॐ विप्रगत्यै नमः ।
ॐ कर्मकर्यै नमः ।
ॐ कौतुकपूजितायै नमः । ६७०
ॐ नानाभिचारचतुरायै नमः ।
ॐ वारस्त्रीश्रीयै नमः ।

ॐ कलामय्यै नमः ।
ॐ सुकर्णधारायै नमः ।
ॐ नौपारायै नमः ।
ॐ सर्वाशायै नमः ।
ॐ रतिमोहिन्यै नमः ।
ॐ दुर्गायै नमः ।
ॐ विन्ध्यवनस्थायै नमः ।
ॐ कालदर्पनिषूदिन्यै नमः । ६८०
ॐ भूमारशमन्यै नमः ।
ॐ कृष्णायै नमः ।
ॐ रक्षोराक्षससाहसायै नमः ।
ॐ विविधोत्पातशमन्यै नमः ।
ॐ समयायै नमः ।
ॐ सुरसेवितायै नमः ।
ॐ पञ्चावयववाक्यश्रीयै नमः ।
ॐ प्रपञ्चोद्यानचन्द्रिकायै नमः ।
ॐ सिद्धिसन्दोहसंसिद्धयोगिनीवृन्दसेवितायै नमः ।
ॐ नित्याषोडशिकारूपायै नमः । ६९०
ॐ कामेश्यै नमः ।
ॐ भगमालिन्यै नमः ।
ॐ नित्यक्लिन्नायै नमः ।
ॐ निराधारायै नमः ।
ॐ वह्निमण्डलवासिन्यै नमः ।
ॐ महावज्रेश्वर्यै नमः ।
ॐ नित्यशिवदूतीति विश्रुतायै नमः ।
ॐ त्वरितायै नमः ।
ॐ प्रथिताख्यातायै नमः ।
ॐ विख्यातायै नमः । ७००
ॐ कुलसुन्दर्यै नमः ।
ॐ नित्यायै नमः ।
ॐ नीलपताकायै नमः ।
ॐ विजयायै नमः ।

ॐ सर्वमङ्गलायै नमः ।
ॐ ज्वालामालायै नमः ।
ॐ विचित्रायै नमः ।
ॐ महात्रिपुरसुन्दर्यै नमः ।
ॐ गुरुवृन्दायै नमः ।
ॐ परगुरवे नमः । ७१०
ॐ प्रकाशानन्ददायिन्यै नमः ।
ॐ शिवानन्दायै नमः ।
ॐ नादरूपायै नमः ।
ॐ शक्रानन्दस्वरूपिण्यै नमः ।
ॐ देव्यानन्दायै नमः ।
ॐ नादमय्यै नमः ।
ॐ कौलेशानन्दनाथिन्यै नमः ।
ॐ शुक्लदेव्यानन्दनाथायै नमः ।
ॐ कुलेशानन्ददायिन्यै नमः ।
ॐ दिव्यौघसेवितायै नमः । ७२०
ॐ दिव्यभोगदानपरायणायै नमः ।
ॐ क्रीडानन्दायै नमः ।
ॐ क्रीडमानायै नमः ।
ॐ समयानन्ददायिन्यै नमः ।
ॐ वेदानन्दायै नमः ।
ॐ पार्वत्यै नमः ।
ॐ सहजानन्ददायिन्यै नमः ।
ॐ सिद्धौघगुरुरूपायै नमः ।
ॐ अपरायै गुरुरूपिण्यै नमः ।
ॐ गगनानन्दनाथायै नमः । ७३०
ॐ विश्वाद्यानन्ददायिन्यै नमः ।
ॐ विमलानन्दनाथायै नमः ।
ॐ मदनानन्ददायिन्यै नमः ।
ॐ भुवनानन्दनाथायै नमः ।
ॐ लीलोद्यानप्रियायै नमः ।
ॐ गत्यै नमः ।

ॐ स्वात्मान्दविनोदायै नमः ।
ॐ प्रियाद्यानन्दनाथिन्यै नमः ।
ॐ मानवाद्यायै नमः ।
ॐ गुरुश्रेष्ठायै नमः । ७४०
ॐ परमेष्ठिगुरुप्रभायै नमः ।
ॐ परमाद्यायै नमः ।
ॐ गुरुवे नमः ।
ॐ शक्त्यै नमः ।
ॐ स्वगुरोः किर्तनप्रियायै नमः ।
ॐ त्रैलोक्यमोहनाख्यायै नमः ।
ॐ सर्वाशापरिपूरकायै नमः ।
ॐ सर्वसङ्क्षोभिण्यै नमः ।
ॐ पूर्वाम्नायचक्रत्रयालयायै नमः ।
ॐ सर्वसौभाग्यदात्र्यै नमः । ७५०
ॐ सर्वार्थसाधकप्रियायै नमः ।
ॐ सर्वरक्षाकर्यै नमः ।
ॐ साधवे नमः ।
ॐ दक्षिणाम्नायदेवतायै नमः ।
ॐ मध्यचक्रैकनिलयायै नमः ।
ॐ पश्चिमाम्नायदेवतायै नमः ।
ॐ नवचक्रकृतावासायै नमः ।
ॐ कौबेराम्नायदेवतायै नमः ।
ॐ बिन्दुचक्रकृतायासायै नमः ।
ॐ मध्यसिंहासनेश्वर्यै नमः । ७६०
ॐ श्रीविद्यायै नमः ।
ॐ नवदुर्गायै नमः ।
ॐ महिषासुरमर्दिन्यै नमः ।
ॐ सर्वसाम्राज्यलक्ष्म्यै नमः ।
ॐ अष्टलक्ष्म्यै नमः ।
ॐ संश्रुतायै नमः ।
ॐ शैलेन्द्रतनयायै नमः ।
ॐ ज्योतिषे नमः ।

ॐ निष्कलायै नमः ।
ॐ शाम्भव्यै नमः । ७७०
ॐ उमायै नमः ।
ॐ अजपायै नमः ।
ॐ मातृकायै नमः ।
ॐ शुक्लवर्णायै नमः ।
ॐ षडाननायै नमः ।
ॐ पारिजातेश्वर्यै नमः ।
ॐ त्रिकूटायै नमः ।
ॐ पञ्चबाणदायै नमः ।
ॐ पञ्चकल्पलतायै नमः ।
ॐ त्र्यक्षर्यै नमः । ७८०
ॐ मूलपीठिकायै नमः ।
ॐ सुधाश्रिये नमः ।
ॐ अमृतेशान्यै नमः ।
ॐ अन्नपूर्णायै नमः ।
ॐ कामदुहे नमः ।
ॐ पाशहस्तायै नमः ।
ॐ सिद्धलक्ष्म्यै नमः ।
ॐ मातङ्ग्यै नमः ।
ॐ भुवनेश्वर्यै नमः ।
ॐ वाराह्यै नमः । ७९०
ॐ नवरत्नानामीश्वर्यै नमः ।
ॐ प्रकीर्तिदायै नमः ।
ॐ परस्मै ज्योतिषे नमः ।
ॐ कोशरूपायै नमः ।
ॐ सैन्धव्यै नमः ।
ॐ शिवदर्शनायै नमः ।
ॐ परापरस्वामिन्यै नमः ।
ॐ शाक्तदर्शनविश्रुतायै नमः ।
ॐ ब्रह्मदर्शनरूपायै नमः ।
ॐ शिवदर्शनरूपिण्यै नमः । ८००

ॐ विष्णुदर्शनरूपायै नमः ।
ॐ स्रष्टृदर्शनरूपिण्यै नमः ।
ॐ सौरदर्शनरूपायै नमः ।
ॐ स्थितिचक्र कृताश्रयायै नमः ।
ॐ बौद्धदर्शनरूपायै नमः ।
ॐ तुरीयायै नमः ।
ॐ बहुरूपिण्यै नमः ।
ॐ तत्त्वमुद्रास्वरूपायै नमः ।
ॐ प्रसन्नायै नमः ।
ॐ ज्ञानमातृकायै नमः । ८१०
ॐ सर्वोपचारसन्तुष्टायै नमः ।
ॐ हृन्मय्यै नमः ।
ॐ शीर्षदेवतायै नमः ।
ॐ शिखास्थितायै नमः ।
ॐ वर्ममय्यै नमः ।
ॐ नेत्रत्रयविलासिन्यै नमः ।
ॐ अस्त्रस्थायै नमः ।
ॐ चतुरस्रस्थायै नमः ।
ॐ द्वारस्थायै नमः ।
ॐ द्वारदेवतायै नमः । ८२०
ॐ अणिमायै नमः ।
ॐ पश्चिमस्थायै नमः ।
ॐ दक्षिणद्वारदेवतायै नमः ।
ॐ वशित्वायै नमः ।
ॐ वायुकोणस्थायै नमः ।
ॐ प्राकाम्यायै नमः ।
ॐ इशानदेवतायै नमः ।
ॐ महिमायै नमः ।
ॐ पूर्वनाथायै नमः ।
ॐ लघिमायै नमः । ८३०
ॐ उत्तरदेवतायै नमः ।
ॐ अग्निकोणस्थगरिमायै नमः ।

ॐ प्राप्त्यै नमः ।
ॐ नैर्ऋतिवासिन्यै नमः ।
ॐ ईशित्वसिद्धिसुरथायै नमः ।
ॐ सर्वकामाये नमः ।
ॐ उर्ध्ववासिन्यै नमः ।
ॐ ब्राह्म्यै नमः ।
ॐ माहेश्वर्यै नमः ।
ॐ कौमार्यै नमः । ८४०
ॐ वैष्णव्यै नमः ।
ॐ वाराह्यै नमः ।
ॐ एन्द्र्यै नमः ।
ॐ चामुण्डायै नमः ।
ॐ वामायै नमः ।
ॐ ज्येष्ठायै नमः ।
ॐ सरस्वत्यै नमः ।
ॐ क्षोभिण्यै नमः ।
ॐ द्राविण्यै नमः ।
ॐ रौद्र्यै नमः । ८५०
ॐ काल्यै नमः ।
ॐ उन्मादनकारिण्यै नमः ।
ॐ खेचरायै नमः ।
ॐ कालकरण्यै नमः ।
ॐ बलानां विकरण्यै नमः ।
ॐ मनोन्मन्यै नमः ।
ॐ सर्वभूतदमन्यै नमः ।
ॐ सर्वसिद्धिदायै नमः ।
ॐ बलप्रमथिन्ये शक्त्यै नमः ।
ॐ बुद्ध्याकर्षणरूपिण्यै नमः । ८६०
ॐ अहङ्काराकर्षिण्यै नमः ।
ॐ शब्दाकर्षणरूपिण्यै नमः ।
ॐ स्पर्शाकर्षणरूपायै नमः ।
ॐ रूपाकर्षणरूपिण्यै नमः ।

ॐ रसाकर्षणरूपायै नमः ।
ॐ गन्धाकर्षणरूपिण्यै नमः ।
ॐ चित्राकर्षणरूपायै नमः ।
ॐ धैर्याकर्षणरूपिण्यै नमः ।
ॐ स्मृत्याकर्षणरूपायै नमः ।
ॐ नामाकर्षणरुपिण्यै नमः । ८७०
ॐ बीजाकर्षणरूपायै नमः ।
ॐ आत्माकर्षणरूपिण्यै नमः ।
ॐ अमृताकर्षिण्यै नमः ।
ॐ शरीराकर्षण्यै नमः ।
ॐ षोडशस्वरसम्पन्नायै नमः ।
ॐ स्रवत्पीयूषमण्डितायै नमः ।
ॐ त्रिपुरेश्यै नमः ।
ॐ सिद्धिदात्र्यै नमः ।
ॐ कलादर्शनवासिन्यै नमः ।
ॐ सर्वसङ्क्षोभचक्रेश्यै नमः । ८८०
ॐ गुह्यतराभिधायै शक्त्यै नमः ।
ॐ अनङ्गकुसुमाशक्त्यै नमः ।
ॐ अनङ्गमेखलायै नमः ।
ॐ अनङ्गमदनायै नमः ।
ॐ अङ्गमदनातुररूपिण्यै नमः ।
ॐ अनङ्गरेखायै नमः ।
ॐ अनङ्गवेगा नमः ।
ॐ अनङ्गाकुशाभिधायै नमः ।
ॐ अनङ्गमालिन्यै नमः ।
ॐ अष्टवर्गाधिगामिन्यै नमः । ८९०
ॐ वस्वष्टककृतावासायै नमः ।
ॐ श्रीमत्त्रिपुरसुन्दर्यै नमः ।
ॐ सर्वसाम्राज्यसुभगायै नमः ।
ॐ सर्वभाग्यप्रदेश्वर्यै नमः ।
ॐ संप्रदायेश्वर्यै नमः ।
ॐ सर्वसङ्क्षोभणकर्यै नमः ।

ॐ सर्वविद्रावण्यै नमः ।
ॐ सर्वाकर्षिण्यै नमः ।
ॐ रूपकारिण्यै नमः ।
ॐ सर्वाह्लादनशक्त्यै नमः । ९००
ॐ सर्वसम्मोहिन्यै नमः ।
ॐ सर्वस्तम्भनशक्त्यै नमः ।
ॐ सर्वजृम्भणकारिण्यै नमः ।
ॐ सर्ववश्यकशक्त्यै नमः ।
ॐ सर्वानुरञ्जन्यै नमः ।
ॐ सर्वोन्मादनशक्त्यै नमः ।
ॐ सर्वार्थसाधिकायै नमः ।
ॐ सर्वसम्पत्तिदायै नमः ।
ॐ सर्वमातृमय्यै नमः ।
ॐ सर्वद्वन्द्वक्षयकर्यै नमः । ९१०
ॐ त्रिपुरवसिन्यै सिद्ध्ये नमः ।
ॐ चतुर्दशारचक्रेश्यै नमः ।
ॐ कुलयोगसमन्वयायै नमः ।
ॐ सर्वसिद्धिप्रदायै नमः ।
ॐ सर्वसम्पत्प्रदायै नमः ।
ॐ सर्वप्रियकर्यै नमः ।
ॐ सर्वमङ्गलकारिण्यै नमः ।
ॐ सर्वकामप्रपूर्णायै नमः ।
ॐ सर्वदुःखविमोचिन्यै नमः ।
ॐ सर्वमृत्युप्रशमन्यै नमः । ९२०
ॐ सर्व विघ्नविनाशिन्यै नमः ।
ॐ सर्वाङ्गसुन्दर्यै नमः ।
ॐ सर्वसौभाग्यदायिन्यै नमः ।
ॐ त्रिपुराश्रियै नमः ।
ॐ सर्वार्थसाधिकायै नमः ।
ॐ दशकोणगायै नमः ।
ॐ सर्वरक्षाकर्यै ईश्वर्यै नमः ।
ॐ योगिन्यै सर्वज्ञायै नमः ।

ॐ सर्वशक्त्यै नमः ।
ॐ सर्वैश्वर्यप्रदायै नमः । ९३०
ॐ सर्वज्ञानमय्यै नमः ।
ॐ सर्वव्याधिविनाशिन्यै नमः ।
ॐ सर्वाधारस्वरूपायै नमः ।
ॐ सर्वपापहरायै नमः ।
ॐ सर्वानन्दमय्यै नमः ।
ॐ सर्वरक्षास्वरूपिण्यै नमः ।
ॐ महाशक्त्यै सर्वेप्सितफलप्रदायै नमः ।
ॐ अन्तर्दशारचक्रस्थायै नमः ।
ॐ त्रिपुरमालिन्यै नमः ।
ॐ सर्वरोगहरायै नमः । ९४०
ॐ रहस्ययोगिन्यै नमः ।
ॐ वाग्देव्यै नमः ।
ॐ वशिन्यै नमः ।
ॐ कामेश्वर्यै नमः ।
ॐ मोदिन्यै नमः ।
ॐ विमलायै नमः ।
ॐ अरुणायै नमः ।
ॐ जयिन्यै नमः ।
ॐ शिवकामप्रदायै देव्यै नमः ।
ॐ शिवकामस्य सुन्दर्यै नमः । ९५०
ॐ ललितायै नमः ।
ॐ ललिताध्यानफलदायै नमः ।
ॐ शुभकारिण्यै नमः ।
ॐ सर्वेश्वर्यै नमः ।
ॐ कौलिन्यै नमः ।
ॐ वसुवंशाभिवर्द्धिन्यै नमः ।
ॐ सर्वकामप्रदायै नमः ।
ॐ परापररहस्यविदे नमः ।
ॐ त्रिकोणचतुरश्रस्थ कामेश्वर्यायुधात्मिकायै नमः ।
ॐ कामेश्वरीबाणरूपायै नमः । ९६०

ॐ कामेशीचापरूपिण्यै नमः ।
ॐ कामेशी पाशहस्तायै नमः ।
ॐ कामेश्यङ्कुशरूपिण्यै नमः ।
ॐ कामेश्वरी रुद्रशक्त्यै नमः ।
ॐ अग्निचक्रकृतालयायै नमः ।
ॐ कामाभिन्नायै नमः ।
ॐ कामदोग्ध्र्यै नमः ।
ॐ कामदायै नमः ।
ॐ त्रिकोणगायै नमः ।
ॐ दक्षकोणेश्वर्यै नमः । ९७०
ॐ विष्णुशक्तियै नमः ।
ॐ जालन्धरालयायै नमः ।
ॐ सूर्यचक्रालयायै नमः ।
ॐ वामकोणगायै नमः ।
ॐ सोमचक्रगायै नमः ।
ॐ भगमालायै नमः ।
ॐ बृहच्छक्तिपूर्णायै नमः ।
ॐ पूर्वास्त्ररागिण्यै नमः ।
ॐ श्रीमत्त्रिकोणभुवनायै नमः ।
ॐ त्रिपुराख्यमहेश्वर्यै नमः । ९८०
ॐ सर्वानन्दमयीशान्यै नमः ।
ॐ बिन्दुगातिरहस्यगायै नमः ।
ॐ परब्रह्मस्वरूपायै नमः ।
ॐ महात्रिपुरसुन्दर्यै नमः ।
ॐ सर्वचक्रान्तरस्थायै नमः ।
ॐ सर्वचक्राधिदेवतायै नमः ।
ॐ सर्वचक्रेश्वर्यै नमः ।
ॐ सर्वमन्त्राणामीश्वर्यै नमः ।
ॐ सर्वविद्येश्वर्यै नमः ।
ॐ सर्ववागीश्वर्यै नमः । ९९०
ॐ सर्वयोगेश्वर्यै नमः ।
ॐ सर्वपीठेश्वर्यै नमः ।

ॐ अखिलेश्वर्यै नमः ।
ॐ सर्वकामेश्वर्यै नमः ।
ॐ सर्वतत्वेश्वर्यै नमः ।
ॐ आगमेश्वर्यै नमः ।
ॐ शक्तिभूदुल्लासायै शक्त्यै नमः ।
ॐ निर्द्वन्द्वाद्वैतगर्भिण्यै नमः ।
ॐ निष्प्रपञ्चायै नमः ।
ॐ प्रपञ्चाभायै नमः । १०००
ॐ महामायायै नमः ।
ॐ प्रपञ्चसूवे नमः ।
ॐ सर्वविश्वोत्पत्तिधात्र्यै नमः ।
ॐ परमानन्दकारणायै नमः ।
ॐ लावण्यसिन्धुलहर्यै नमः ।
ॐ सुन्दरीतोषमन्दिरायै नमः ।
ॐ शिवकामसुन्दरीदेव्यै नमः ।
ॐ सर्वमङ्गलदायिन्यै नमः । १००८

इति श्रीरुद्रयामले उमामहेशसंवादे श्रीशिवकामसुन्दर्याः श्रीमत्त्रिपुरसुन्दर्याः षोडशार्णायाः तुरीयसहस्रनामावलिः सम्पूर्णम् ॥

Proofread by DPD, Sneha Sudha snehasudha13 at gmail.com

*Shri Shivakamasundari Sahasranamavali from Rudrayamala*

pdf was typeset on December 17, 2022

Please send corrections to *sanskrit@cheerful.com*